# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा -आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – २** | गुणाः - ७० |
|---|---|---|
| विषयः - वास्तुशास्त्रम् | (C.C.- 4.1.1. Old & New ) | |
| दिनाङ्कः - १५/१२/२०१८ | *ग्रन्थः मयमतम्* | समयः -२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितयोः एकाकारिका ससन्दर्भं व्याख्यात ।** **( ५ )**

*(१) स्तम्भानां लक्षणं चैव प्रस्तारस्य विधिक्रमम् ।*
*सन्धिकर्मविधानं च शिखराणां तु लक्षणम् ॥*

*(२) पशुगन्धसमा श्रेष्ठा सर्वबीजप्ररोहिणी ।*
*एकवर्णा घना स्निग्धा सुखसंस्पर्शनान्विता ॥*

**प्रश्नः २** *वस्तुप्रकारः, इति अध्यायस्य सारांशः लिखत ।* **( १० )**

**( अथवा )**

*भूपरिग्रहविधानं ग्रन्थाधारेण सविस्तरयत ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयो एकस्य सान्वयं व्याख्यां कुरुत ।** **( ५ )**

*(१) दन्तं वै चन्दनं चैव खदिरः कटरः शमी ।*
*शाकश्च तिन्दुकश्चैव शङ्कुवृक्षा उदीरिताः ॥*

*(२) वास्तुर्मध्ये तु मर्माणि ब्रह्मा हृदयमुच्यते ।*
*निष्कूटांशाः सिरा ज्ञेया इत्येष पुरुषः स्मृतः ॥*

**प्रश्नः ४** *एकाशीतिवास्तुपदमण्डलं देवतास्थानभोग्यसहितं प्रदर्शयत ।* **( १० )**

**( अथवा )**

*दिशानिर्धारणे सूत्रविन्यासः ग्रन्थाधारेण वर्णयत ।*

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयो एकाकारिका वाख्यात ।** **( ५ )**

*(१) तस्मात् प्राग्दक्षिणतो दक्षिणवीथी प्रतीविमुखा ।*
*तस्मादवागपरतः पश्चिमवीथ्यग्रमुत्तरतः ॥*

*(२) प्रागुत्तरदिशिदण्डैः पञ्चशतैः स्याच्छवावासम् ।*
*शेषाणामपि तत्तद्दूरे देशे श्मशानं स्यात् ॥*

**प्रश्नः ६** *ग्रामविन्यासे वीथिविधानं ग्रन्थाधारेण स्पष्टयत।* **( १० )**

**( अथवा )**

*ग्रामविन्यासे द्वारस्थानानि वास्तुपदमण्डलाधारेण दर्शयत।*

**चतुर्थान्वितिः**

**प्रश्नः ७ निम्नलिखितयो एकस्य ससन्दर्भं व्याख्यां कुरुत । ( ५ )**

*(१) शतदण्डादिदशद्धर्या त्रिः सप्तत्रिशतदण्डान्तम्।*
*क्षुद्राणामिहमुदितं नगराणामेव सर्वेषाम्॥*

*(२) राष्ट्रस्य मध्यभागे सज्जनबहुले नदीसमीपे च।*
*नगरं केवलमथवा राजगृहोपेतराजधानी वा॥*

**प्रश्नः ८** *राजधानीनगरनिर्माणविधानं ग्रन्थाधारेण प्रदर्शयत।* **( १० )**

**( अथवा )**

*नगरे अन्तरायणविधानं ग्रन्थोक्तदिशा वर्णयत।*

**पञ्चमान्वितिः**

**प्रश्नः ७ अधोलिखितेषु केषाश्चित् दशप्रश्नाः समाधेयाः । ( १० )**

*(१) दक्षिणप्लवाभूम्याः फलं किम् ?*
*(२) सर्वबीजप्ररोहिणी भूम्याः फलं किम् ?*
*(३) मधुगन्धाभूमिः शुभाशुभं वा ?*
*(४) शङ्कुस्थापनं कस्मिन् कार्ये प्रयुज्यते ?*
*(५) रक्तगन्धभूम्याः वर्णः कः ?*
*(६) अष्टयुका = कति यवः ?*
*(७) पंचकवास्तुपदमण्डले कति पदानि सन्ति ?*
*(८) नगरनिर्माणे कस्मिन् वास्तुपदमण्डलस्य प्रयोगः भवति ?*
*(९) अन्तरापणम् इत्युक्ते किम् ?*
*(१०) व्याख्यां कुरुत - राजधानीनगरम्।*
*(११) भल्लाटपदोपरिद्वारस्थापयितुं शक्यते न वा ?*
*(१२) खदिरवृक्षः शङ्कुनिर्माणे प्रयुज्यते न वा ?*
*(१३) संग्रहाध्याये ग्रन्थकर्ता केषां देवानां नमस्करोति ?*
*(१४) नगरे वप्रनिर्माणं किमर्थं करणीयम् ?*
*(१५) वास्तुपूजने वास्तुपदमण्डलदेवानां बलिं दातव्यं न वा ?*

--oo--